International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(4): 75-77
© 2023 IJSR
www.anantaajournal.com
Received: 22-05-2023
Accepted: 01-07-2023

**अर्घ्यदीप राय**
सहकारी अध्यापक, संस्कृत विभाग खलिसानी महाविद्यालय, चन्दननगर, हुगली, पश्चिमवङ्ग, भारत

**Corresponding Author:**
**अर्घ्यदीप राय**
सहकारी अध्यापक, संस्कृत विभाग खलिसानी महाविद्यालय, चन्दननगर, हुगली, पश्चिमवङ्ग, भारत

# वेदान्तसारग्रन्थे आचार्यसदानन्दयोगीन्द्रेण अनुसृता लेखनशैली

**अर्घ्यदीप राय**


**सारांश**
भारतीयदर्शनशास्त्रे अद्वैतवेदान्तस्य दीर्घपरम्परा विद्यते। यद्यपि आचार्यशंकरः अद्वैतवेदान्तशास्त्रस्य मुख्यप्रतिपादकः इति कथ्यते तथापि तस्य परमगुरुः आचार्यगौडपादः ततः पूर्वम् आचार्यकाशकृत्स्यादयः अपि अद्वैततत्त्वम् उक्तवन्तः। शंकराचार्य्यस्य समकालीनाचार्यः मण्डनमिश्रः, अपि च शंकराचार्य्यस्य अन्तेवासिनः पद्मपादाचार्यादयः, तथा प्रकाशात्मयतिः चित्सुखाचार्यः नृसिंहाश्रमः इत्यादयः अद्वैताचार्याः शंकरमतं प्रचारितवन्तः। परन्तु आचार्यसदानन्दयोगीन्द्रेण वेदान्तसारग्रन्थद्वारा अद्वैतसिद्धान्तः अत्यल्पपरिसरे यथा प्रतिपादितः, तथा अन्येन केनापि वेदान्तभाष्यकृता वेदान्तव्याख्याकारेण वा कर्तुं न शक्तः। वेदान्तसारग्रन्थः ब्रह्मसूत्राणां अन्येषां वा वेदान्तग्रन्थानां न टीका, न वा व्याख्यानम्; अपि तु अद्वितीयः ग्रन्थोऽयम् अद्वैतवेदान्तस्य स्वतन्त्रग्रन्थरूपेण प्रसिद्धोऽस्ति। केचन् विद्वांसः इमं ग्रन्थं प्रकरणग्रन्थमिति वदन्ति, किन्तु वेदान्तदर्शनस्य प्रायः सर्वेऽपि महत्त्वपूर्णसिद्धान्ताः अस्मिन् ग्रन्थे उल्लेखिताः सन्ति इत्यतः नायं प्रकरणग्रन्थ इति मन्ये। अस्य ग्रन्थस्य लेखने या अभिनवा लेखनशैली ग्रन्थकृता अनुसृता सैव वर्तमानप्रबन्धे विचार्यते अस्माभिः।

**कूट शब्द** : आध्यासभाष्यम्, अध्यारोपः, अपवादः, सूक्ष्मशरीराणि, पञ्चीकरणम, जीवन्मुक्तिः

**प्रस्तावना**
आचार्यशङ्करः वेदान्तशास्त्रस्य किमपि लक्षणं न दत्तवान्, किन्तु ब्रह्मसूत्रभाष्ये तत्र तत्र उपनिषद्वचनानि प्रमाणरूपेण उद्धृतवान्। आचार्यसदानन्देन तु ग्रन्थारम्भे एव "वेदान्तो नाम उपनिषत् प्रमाणम्" इति वेदान्तशास्त्रस्य लक्षणं कृतम्। ब्रह्मसूत्राणां श्रीमद्भगवद्गीतादिस्मृतिग्रन्थानां च "तदुपकारिणी शारीरकसूत्रदिनी च" इति उक्त्या वेदान्तशास्त्रे अन्तर्भावः तेन अङ्गीकृतः एव। अतः तस्य लेखनशैली आचार्यशङ्करम् अनुसरति इति ग्रन्थारम्भादेव विस्पष्टम् भवति। अतः परं वेदान्तशास्त्रस्य अनुबन्धचतुष्टयम् उक्त्वा परमरहस्यमपि ब्रह्मस्वरूपं कथम् उपदेष्टव्यम् इति विचारयन् आह "स गुरुः परमकृपया अध्यारोप-अपवाद-न्यायेन एनम् उपदिशति" इति।
अखण्डब्रह्मस्वरूपस्य अगोचरत्वेन विधिमुखेन उपदेष्टुम् अशक्यत्वेऽपि "नेह नानास्ति किञ्चन" इत्यादि-श्रुतिमनुसृत्य अविद्यारोपित-मिथ्या-नानापदार्थ-निषेधमुखेन उपलक्षितम् अखण्डचैतन्यम् एव पुनः "सत्यं ज्ञानम् अनन्तं ब्रह्म" इत्यादि श्रुतिमनुसृत्य लक्षणया विधिमुखेनापि शास्त्रेषु उपदिश्यते। अतः ग्रन्थकारेण सदानन्दयोगीन्द्रेणापि वेदान्तसारग्रन्थ-प्रनयणे "अध्यारोप-अपवाद"न्याय-शैली एव अनुसृतः इति वक्तुं शक्यते।

आचार्यशङ्करः शारीरकमीमांसाभाष्यस्य प्रारम्भे आध्यासभाष्यं विरच्य अध्यारोपस्य स्थापनां कृतवान् इति दृश्यते। आचार्यसदानन्दः अपि ग्रन्थस्य प्रथमार्धे अध्यारोपस्य लक्षणमुक्त्वा ब्रह्मणः जगत्-पर्यन्तं वस्तुनः अवस्तुपर्यन्तं वा सृष्टिप्रकृयाम् अध्यारोपपरत्वेन व्याख्यातवान्। अध्यरोपः अध्यासः वा अद्वैतवेदान्तशास्त्रस्य आधारभूतः। अध्यारोप-अपवादन्यायेन ब्रह्मविद् गुरुः ब्रह्मतत्त्वम् उपदिशति इति कारणतः प्रथमः प्रश्नः "कोऽयं अध्यासः नाम?" आचार्यशंकरः अध्यासभास्ये "स्मृतिरूपः परत्र पूर्वदृष्टावभासोऽध्यासः" [i] इत्यवदत्। तमेव अनुसरन् आचार्यसदानन्दः "असर्पभूतायां रज्जौ सर्पारोपवत् वस्तुनि अवस्त्वारोपः अध्यारोपः" इत्यगादि। वस्तुः सच्चिदानन्दं ब्रह्म, अन्यत् सर्वम् अवस्तुः। असर्पभूतायां रज्जौ सर्पस्य भ्रमः वयं सर्वे अनुभवामः। अतः सः परिचितेन उदाहरणेन व्याख्यातवान्, ब्रह्मणि जगतः आरोपः अध्यारोपः, यथा रज्जौ सर्पस्य आरोपः इति। अध्यारोपस्य मूले अस्ति अविद्या, सैव अविद्या ब्रह्मस्वरूपम् आवृणोति, ब्रह्मणि भ्रमात्मकं जगत् प्रदर्शयति। अज्ञानस्य लक्षणत्वेन आचार्यः "सदसद्भ्यामनिर्वचनीयं त्रिगुणत्मकं ज्ञानविरोधि भावरूपं यत्किञ्चित्" इत्यवादि । अस्य अज्ञानस्य एकत्वेऽपि समष्टि-अभिप्रायेण एकमिति व्यवह्रियते व्यष्टि-अभिप्रायेण अनेकमिति च व्यवह्रियते। समष्ट्यज्ञान-उपहितं चैतन्यम् ईश्वर इत्युच्यते। तच्च विशुद्धसत्त्वप्रधानं सर्वज्ञत्व-सर्वेश्वरत्वादिगुणकम् अन्तर्यमी जगत्कारणं च। व्याष्टि-अज्ञान-उपहितं चैतन्यं प्राज्ञ इत्युच्यते। तत्र सर्वज्ञः, मलिनसत्त्वप्रधानत्वात्। व्याष्टि-अज्ञानस्य शक्तिः द्विविधा; आवरणशक्तिः विक्षेपशक्तिश्च। आवरणरूपया आच्छादनशक्त्या विषयम् आवृत्य अज्ञानं विक्षेपशक्त्या अविषयं सृजति। वस्तुतस्तु अज्ञानस्य आत्मावरकत्वं नास्ति, किन्तु प्रमातृबुद्धिमात्र-आच्छादकत्वेन अज्ञानस्य आत्माच्छादकत्वम् उपचारादुच्यत इति। विक्षेपशक्तिस्तु तमःप्रधाना, तयोपहितात् चैतन्यात् आकाशः आकाशाद्वायुः वायुरग्निः अग्नेः आपो अद्भ्यः पृथिवी उत्पद्यते; अत्र श्रुतिः प्रमाणम् "तस्माद्वा एतस्मादात्मन आकाशः सम्भूत"[ii] इति। एतानि आकाशादितन्मात्राणि अपञ्चीकृतनि सूक्ष्मभूतानि उच्यन्ते; एतेभ्य एव सूक्ष्मशरीराणि स्थूलभूतानि च उत्पद्यन्ते।

सूक्ष्मभूतानि परस्परं मिलित्वा स्थूलभूतानि यत् उत्पद्यन्ते, एषा प्रक्रिया पञ्चीकरणम् इति कथ्यते। पुनः सूक्ष्मभूतेभ्यः सूक्ष्मशरीराणि अपि निर्मीयन्ते, इमानि सूक्ष्मशरीराणि सप्तदश-अवयवानि प्रमाणायकोश-मनोमायकोश-विज्ञानकोश इति कोशत्रयरूपेण व्यवस्थितानि। एवम् ईश्वरचैतन्ये सामान्यतो महाप्रपञ्चस्य अध्यारोपः व्याख्यातः। पुनः प्रत्यगात्मनि देहादि-अनात्मपदार्थानां आरोपात्मकं विशेष-अध्यारोपं वक्तुकामैः ग्रन्थकारैः जीवात्माविषयकं विविधमतं तद्यथा चार्वाकानां पुत्रात्मवादः देहात्मवादः इन्द्रियात्मवादश्च बौद्धानां विज्ञानात्मवादः शून्यात्मवादश्च भाट्टानां ज्ञानाज्ञानात्मस्वरूपात्मवादः प्राभाकराणां अज्ञानात्मवादश्च समुल्लिख्य एतेषां मतानाम् अवैतथ्यं प्रदर्श्यते। ततस्तेन वेदान्तप्रतिपादितं नित्य-शुद्ध-बुद्ध-मुक्त-सत्यस्वभावं प्रत्यक्चैतन्यम् एव आत्मवस्तु इति अब्रवित्। एवम् अध्यारोपः व्याख्यातः आचार्येण सदानन्दयोगीन्द्रेण। अध्यारोपन्यायेन ब्रह्मणः जगतो उत्पत्तिप्रक्रिया अपि एवं व्याख्यातं भवति वेदान्ततसारग्रन्थे।




ब्रह्मैव जगतः अभिन्न-निमित्तोपादानकारणम् इति अद्वैतसिद्धान्तः। किन्तु ब्रह्म न जगदाकारेण विपरिणमति, अपि तु जीवः जगत् च ब्रह्मणो विवर्त एव। अतः आवरण-विक्षेपशक्तिमता अज्ञानेन यथा ब्रह्म जगदाकारेण विवर्तते तथैव अज्ञाननाशे ब्रह्मविवर्तस्य जगतः ब्रह्ममात्रत्वम् एव अवशिष्यते। सैव अविद्याविनाशक्रमः अपवादः इत्युच्यते। उक्तञ्च आचार्यसदानन्दयोगीन्द्रेण –"अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववत् वस्तुविवर्तस्य अवस्तुनः अज्ञानादे प्रपञ्चस्य वस्तुमात्रत्वम्" इति । यथा स्वल्पालोकिते पथि वर्तमाना रज्जुः सर्पवदवभासते आलोकाभावात् तथैव नित्य-शुद्ध-बुद्ध-मुक्त-सच्चिदानन्दस्वरूपं ब्रह्म जडवदवभासते शुद्धज्ञानाभावात्। अथ ब्रह्मसाक्षात्कारेण स्वरूपाधिगमे अखिलप्रपञ्चस्य ब्रह्ममात्रत्वं पुनरनुभूयते। किन्तु नायं ब्रह्मसाक्षात्कारक्रमः सुगमः। अतः आचार्य अपवादक्रमं वक्तुकामः प्रारम्भे एव महावाक्यार्थविचारे प्रवर्तते। सन्ति उपनिषत्सु चत्वारि

महावाक्यानि – “प्रज्ञानं ब्रह्म” [iii], “अहं ब्रह्मास्मि” [iv], “तत्त्वमसि” [v] “अयमात्मा ब्रह्म” [vi] चेति। अतः गुरुमुखात् तत्त्वमस्यादि-वाक्यश्रवणात् देहादि-अहंकारान्त-जडपदार्थ-सकल-दृश्यविलक्षण-प्रत्यगात्मनः शुद्धेन परमात्मना सह एकत्वबोधानन्तरं मुमुक्षुरधिकारी सर्वोपाधि-विनिर्मुक्तं सच्चिदानन्दैकरसम् अहं ब्रह्मास्मि इति महावाक्यार्थम् अनुस्मरण् आनन्दमनुभवति। किन्तु एकस्मात् महावाक्यात् अपरस्य महावाक्यस्य अर्थावधारणं न सुकरम्। तदर्थं कठोर-अभ्यासस्य आवश्यकता वर्तते, इत्यतः श्रवण-मनन-निदिध्यासनमिति साधनत्रयम् उपदिष्टम् आचार्येण। तत्र श्रवणं नाम “षड्विधैः लिङ्गैः अशेषवेदान्तनाम् अद्वितीयवस्तुनि तात्पर्यावधारणं" इति। तत्र लिङ्गानि सन्ति – उपक्रमोपसंहार-अभ्यास-अपूर्वता-फल-अर्थवाद-उपपत्ति इत्याख्यानि। मननं तु निरन्तरं चिन्तनम्, अद्वितीयब्रह्मवस्तुनः वेदान्तप्रतिपद्यार्थानुकूलवादेन निरन्तरविचार इति। निदीध्यासनं नाम निर्विचिकित्से अर्थे स्थापितस्य चेतसः एकतानत्वं, योगदर्शने यत् ध्यानमित्युच्यते। उक्तञ्च योगचिन्तामणौ – “प्रत्ययस्य चित्तवृत्तेः विजातीय-प्रत्यय-तिरस्कारेण सजातीयप्रत्ययप्रवाहीकरणं यत् तद्ध्यानमित्युच्यते” इति। ध्यानस्य पराकाष्ठा समाधिः। समाधिः द्विविधः, सविकल्पकः निर्विकल्पकश्च। समाधिप्राप्तस्य स्थितेऽपि जडशरीरे यत् संसारबन्धनान्मुक्तिः सा जीवन्मुक्ति इत्युच्यते। जीवन्मुक्तः नाम स्वस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डब्रह्मणि साक्षात्कृते अज्ञान-तत्कार्य-सञ्चितकर्म-संशयविपर्ययादीनामपि बाधितत्वात् अखिलबन्धरहित ब्रह्मनिष्ठः इति ग्रन्थकृता उक्तम्। जीबन्मुक्तस्य सांसारिकव्यवहारः तावदेव वर्तते यावत् स पञ्चीकृतशरीरे वर्तते “तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्यते”[vii]। किन्तु सांसारिककर्मणि विचरन् अपि न स कर्मफलेन मनागपि बद्धो भवति; नष्टे शरीरे तस्य चरममुक्तिः विदेहमुक्तिरित्युच्यते। अत स परमकैवल्यम् अधिगम्य आनन्दैकरसं अखिलभेदप्रतिभासरहितं अखण्डं ब्रह्म अवतिष्ठते। अनेन प्रकारेण जीवात्मनः पुनः ब्रह्मभावापत्तिः अपवादन्यायेन व्याख्यातम्। अतः सम्पूर्णं वेदान्तशास्त्रमपि अध्यारोप-अपवादन्याये एव व्याख्यातं ग्रन्थकारैः इति सिद्धान्तः।

**सन्दर्भ सूची**


1. उपनिषद्वाक्यकोशः। सम्पा • कोलोनेल् जी.ए.ज्याकोब। मोतीलाल बनारसीदास। दिल्ली। १९६३॥
2. वेदान्त दर्शनम् (१म भाग १म खण्ड)। अनु • म.म. प्रमथनाथ तर्कभूषण। सम्पा • श्रीराजेन्द्रनाथ घोष। पश्चिमवङ्ग राज्य पुस्तक पर्षत्। कोलकाता। १९९१॥
3. वेदान्तसारः, श्रीमदापदेवकृतबालबोधिनीव्याख्यासहितः। श्रीसदानन्दयतीन्द्रः। श्रीवाणीविलास-मुद्रायन्त्रालय। श्रीरङ्गम्। १९११।
4. श्रीब्रह्मसूत्रगोविन्दभाष्यम् ( हिन्दीभाषानुवादसहितम् ) – श्रीवलदेवविद्याभूषण-महोदय-विरचितम्। प्रका • कृष्णदास, कुसुमसरोवरवाले। मथुरा, वृन्दावन। वि.स. २०११॥
5. श्रीमद्भगवद्गीता, शांकरभाष्यसमेता। सम्पा • विणायक गनेश आपटे। आनन्दाश्रममुद्रणालयः। पुना। १९२७॥
6. श्रीब्रह्मसूत्रभाष्यम्-श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्। सम्पा • आर्. राघवेन्द्राचार्य। मईसूर। १९११॥


---

[i] अध्यासभाष्यम्

[ii] तैत्तिरीयोपनिषत् २-१-२

[iii] ऐतरेय उपनिषद १/२

[iv] बृहदारण्यक उपनिषद १/४/१०

[v] छान्दोग्य उपनिषद ६/८/७

[vi] माण्डूक्य उपनिषद १/२

[vii] चान्द्योग्योपनिषत् ६.१४.१२